# શ્રીગર્ભસ્તોત્રમ્

Shri Garbhastotram

sanskritdocuments.org

March 31, 2019

# Shri Garbhastotram

# શ્રીગર્ભસ્તોત્રમ્

## Sanskrit Document Information

Text title : garbhastotram

File name : garbhastotram.itx

Category : devii, devI, jaina

Location : doc_devii

Proofread by : DPD

Latest update : March 30, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 31, 2019

*sanskritdocuments.org*

# શ્રીગર્ભસ્તોત્રમ્

હ્રીઙ્કારોદરવાગ્ભવૈકવસતિર્યા કુણ્ડલી કૌલિની
બ્રહ્માનન્દમયી પરા પરકલા ષડ્ગ્રન્થિસમ્ભેદિની ।
સાહસ્રં પદપદ્મકોટરલસત્સોમેન સાર્દ્ધં મુદા
ક્રીડન્તી સુખસમ્પદં દિશતુ નઃ શ્રીમત્ત્રિખણ્ડેશ્વરી ॥ ૧॥

શ્રીમત્પઞ્ચદશાક્ષરી શિવકલાધારાદિચક્રેષુ યા
સ્ફૂર્ત્તિઃ પઞ્ચદશસ્તથોનવતયા ત્રેધાપિ યા સંસ્થિતા ।
ઉન્મન્યન્તમુપાગતા કુલકજપ્રોદ્દામસૌદામિની
માયામોહનિકૃન્તિની નિજસુખં મહ્યં પ્રસદ્યાત્સદા ॥ ૨॥

કશ્ચિત્પઙ્કજસમ્ભવઃ કરુણયા પૂર્ણસ્ત્વયા વિશ્વસૃક્
વેદાદિર્વિયદાદિતત્ત્વમમલં ત્વત્સામરસ્યં સ્ફુટમ્ ।
તદ્વેદત્રિપુરે કૃપામૃતરસોન્મથ્યાઽપ્યનન્યા શ્રિયે
દૃષ્ટિં દેહિ તતઃ સમુજ્જ્વલતરાનન્દસ્વભાવો ભવે ॥ ૩॥

એતત્તે ત્રિપુરે ! ત્વદીયવપુષા સા ચિત્રવર્ણાધ્વના
વ્યસ્તં વિશ્વમનુત્તરોત્તરતયા યદ્બીજમુદ્બીયતે ।
તન્મે તાણ્ડવમણ્ડિતં રસનિકા સારસ્વતેનાહતં
વિસ્ફૂર્જત્કલકોકિલારજતયોદ્વેલં જરીજૃમ્ભતે ॥ ૪॥

ઈકારોઽસિ હુતાશનેન્દુતપનૈર્બિન્દુત્રયૈઃ સંયુતઃ
કામાત્માજનની સ્થિતિં વિતનુતે બ્રહ્મૈકયઃ કેશવઃ ।
યત્વં દેવિ ! પુરે સુધારસવચઃ કલ્લોલકલ્લોલિની
જિહ્વાતઃ પ્રસરીસરીતુ ભવતી કારુણ્યતસ્તદ્દ્રુતઃ ॥ ૫॥

લક્ષ્મીં લક્ષ્મિલલામધામબહુલાં મત્તેમકુમ્ભોચ્છલ-
દ્દાનામ્ભોન્કતપૂરપદક્વિકટાં દેહ્યમ્બ ! મહ્યે યતઃ ।
ત્વં સૃષ્ટિસ્થિતિભેદિની મધુજિતઃ શક્તિર્વિરઞ્ચેર્નિજા
યદ્વા વાગ્ભવમધ્યગા વિલસસિ શ્રીમન્ત્રિખણ્ડેશ્વરિ ! ॥ ૬॥

હ્રીઙ્કારાદિહરાબ્જયોનિવિલસંસારસઙ્કોચિની
યા બેયારતયેશ્વરસ્ય ભદ્વિતા વાગેશ્વરી જૃમ્ભને ।
વિન્દૌ નાદતયા ચ બીજવસતિર્યાઽનુત્તરા શામ્ભવી
શ્રીમત્ત્રિપુરસુન્દરી વિજયતે ખણ્ડે સ્થિતા વાસ્તવે ॥ ૭॥

હઃ કામઃ શિવબીજતો હરિમ્યં યન્મોહયત્યઙ્ગના
સ્થિત્યા ત્વચ્ચરણપ્રસાદશતઃ શ્રીકામરાજાદિનઃ ।
માતર્ભક્તિસમીહિતં સૃજતિ યદ્ધૈર્ય .......રં શ્ચયઃ
સોઽયં મેઽખિલકાઙ્ક્ષિતં વિતરતાં કામેશ્વવરપ્રેયસી ॥ ૮॥

સત્તારૂપિણિ ! સજ્જનૈકનિલયે ! સૌભાગ્યસમ્પત્પ્રદે !
સાવિત્રીતિ સરસ્વતીતિ ગદિતા લક્ષ્મીસ્ત્વમેવાસિ સા ।
તત્કામેશ્વરશમ્ભુપત્નિ ! મમ યત્કાઙ્ક્ષાધિરૂઢં ભવેત્
તદ્દેહિ ત્વરિતં તપોભિરપિ યદ્ દુષ્પ્રાપમન્યૈરપિ ॥ ૯॥

કલ્યાણં કમલાપતિઃ કરુણયા કામેશ્વરઃ કાઙ્ક્ષિતં
દધાન્મધ્યમખણ્ડતસ્તવ શવે મધ્યે સ્થિતઃ કાન્મના ।
કન્દર્પપ્રતિમઃ કલાસુ કુશલઃ કલ્પદ્રુમઃ કામિનાં
યસ્યોચ્ચારવશેન રાજતિ નરઃ શ્રીમત્ત્રિખણ્ડાત્મિકે ! ॥ ૧૦॥

હસ્ત્વન્માધ્યમખણ્ડલે ચ વસતિર્યોઽમ્બ ! દ્વિતીયસ્થિતિં
પુષ્ણાત્યેકતયૈવ ચાધિકતયા બન્ધુકપુષ્પપ્રભઃ ।
સૌભાગ્યં પરમં સ મે વિતરતા વશ્યા ભવેયુર્યતો
રાજાનો વરયોષિતશ્ચ નિભૃતાઃ સૌખ્યશ્રિયઃ સમ્મતા ॥ ૧૧॥

લક્ષ્યં મે મનસો મનોરમતમં સૌન્દર્યસોમાલયો
બન્ધૂકપ્રભવારુણં કરલસચ્ચાપેષુ પાશાઙ્કુશમ્ ।
કાઞ્ચીનદ્ધનિતમ્બબિમ્બસુભગં મધ્યે ન કિઞ્ચિચ્ચ યત્
રૂપં તે કુચચક્રવાકખિલસચ્ચન્દ્રાલિકં સ્તા સદાત્ ॥ ૧૨॥

હ્રીઙ્કારે હરમાન્મથીન્દુરણિતૈઃ શ્રોકામરાજાન્તિગે
ખણ્ડે મણ્ડનમાવહન્તિ હરયઃ સઙ્કોચતઃ સંસ્થિતે ।
રુદ્રઃ શક્તિયુતશ્ચ મન્મથકલાકામેશ્વરેણેન્દુના
નાદાત્મા ચ પરાપરેણ ભવતાન્મત્કામસમ્પૂર્તયે ॥ ૧૩॥

સચ્ચિત્સૌખ્યમખણ્ડિતં શિવમયં શક્તિસ્વરૂપોલ્લસ-

    ત્તાર્તીયે તવ સંહૃતો પ્રથમતઃ સદ્વૃત્તતોજ્જૃમ્ભતે ।
શઙ્કાતઙ્કકલઙ્કભાવજનિતં ભેદઃ પ્રથાતઃ શિવે
    તન્મે પૂર્ણશશાઙ્કમણ્ડલનિભં કુર્યાદશં દૂરતઃ ॥ ૧૪॥

કશ્ચિજ્જન્મશતાર્જિતેન તપસા તત્પાદપદ્મદ્વયે
    જાતપ્રીતિરનન્યભાવમનસા લબ્ધ્વા ગુરોઃ સત્કૃપામ્ ।
કં વેદ ત્રિપુરે તૃતીયશકલે કામેશ્વરાખ્યં હરિં
    પૂર્ણાનન્દવિભૂતિદં ત્રિજગતીવશ્યઙ્કરં તં શ્રયે ॥ ૧૫॥

લબ્ધ્વાદેશકરાજવીક્ષણકૃપાં ત્વાં વેદ કામેશ્વરીં
    ધન્યો યસ્ત્રિપુરે !  ત્વદઙ્ઘ્રિકૃપયા વિશ્વાત્મસામ્રાજ્યભૂ ।
લક્ષ્મીસ્તં વૃણુતે કટાક્ષવશતસ્તસ્ય જ્વરોપપ્લવા
    નાશં યાન્તિ સદા વિષાણિ ચ મહાવેતાલભૂતગ્રહાઃ ॥ ૧૬॥

શ્રીમત્યમ્બ !  વિરાજતે તવ પરં ખણ્ડં તૃતીયાન્તિમં
    બીજં તત્ર હરૌ હરો પ્રથમતો યા રુદ્રશક્તિઃ સ્વયમ્ ।
સંહારૈકરસો મનોભવકલાવહ્નીન્દુસૂરા પરા
    બિન્દુર્યોઽપિ પરેશ્વરો મમ સદા કુર્વન્તુ તે મઙ્ગલમ્ ॥ ૧૭॥

ઇતિ શ્રીગર્ભસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by DPD

---

*Shri Garbhastotram*

pdf was typeset on March 31, 2019

Please send corrections to *sanskrit@cheerful.com*